Begins on fol. 3*b* of the MS. described under No. 8 03 .

Complete.

Same as the above.

No. 8916. कृष्णाष्टोत्तरशतनामावलिः.

KṚṢNĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 55*b* of the MS. described under No. 8859

Incomplete.

Same as the above.

No. **8917.** कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 67*b* of the MS. described under No. 2825, wherein this work has been omitted to be mentioned.

Incomplete.

Same as the above.

No. **8918.** कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 8899.

Complete.

Same as the above.

The MS. is dated the second day of the bright fortnight in the month of Śrāvaṇa of the year Plavaṅga.

No. **8919.** कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 10. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 8880.

Complete.

Same as the above.

No. **8920.** कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 5. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 20*a*. The other works herein are Gōvindadaśaka 1*a*, Rāmabhujaṅga 2*a*, Rāmastavarāja 5*a*, Dattātrēyastōtra 10*a*, Mādhavastavarāja 13*a*, Śatāparādhastōtra 20*b*, Gautamastōtra 23*a*,

Candraśēkharāṣṭaka 26*a*, Mahādēvāṣṭōttaraśatanāmāvali 28*a*, Bhāratasāvitrī 33*a*, Śivasahasranāman 36*a*, Maṅgalāṣṭaka 41*a*.

Complete.

Same as the above.

No. **8921.** कृष्णाष्टोत्तरशतनामावलिः.

KṚṢṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 18*a* of the MS. described under No. 8900.

Complete.

Same as the above.

Colophon:

कृष्णाष्टोत्तरशतकं सम्पूर्णम् ॥

No. **8922.** केशवादिनामस्तोत्रम्.

KEŚAVĀDINĀMASTŌTRAM.

Pages, 12. Lines, 5 on a page.

Begins on fol. 121*a* of the MS. described under No. 5660, wherein the work has been mentioned as Kēśavanāmāni in the other works.

Complete.

This contains 24 stanzas, each of which is addressed to the tongue of the devotee which is asked to taste always the bliss, the name and the feet of Viṣṇu mentioned under 24 different names, beginning with Kēśava and ending with Śrī-Kṛṣṇa, in the stanzas.

Beginning:

केशवब्रह्मानन्दरसं केशवनामसुधारसम् ।
केशवपादाम्बुजरसं पिब जिह्वे निरन्तरम् ॥
नारायणब्रह्मानन्दरसं नारायणनामसुधारसम् ।
नारायणपादाम्बुजरसं पिब जिह्वे निरन्तरम् ।

End :

पुरुषोत्तमब्रह्मानन्दरसं पुरुषोत्तमनामसुधारसम् ।
पुरुषोत्तमपादाम्बुजरसं पिब जिह्वे निरन्तरम् ॥

केशव, नारायण, माधव, गोविन्द . . . .
जनार्दन, उपेन्द्र, हरे, श्रीकृष्ण.

No. **8923.** गोपालसहस्रनामस्तोत्रम्.
GŌPĀLASAHASRANĀMASTŌTRAM

Substance, paper. Size, 7⅞ × 6½ inches. Pages, 8. Lines, 26 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete. This is taken from Sammōhanatantra.

Similar to the one described under No. 8888, Gōpāla being another name of Śrī-Kṛṣṇa.

Beginning :

कैलासशिखरे रम्ये गौरी पृच्छति शङ्करम् ।
ब्रह्माण्डाखिलनाथस्त्वं सृष्टिसंहारकारक ॥
त्वमेव पूज्यसे लोके ब्रह्मविष्णुसुरादिभिः ।
नित्यं पठसि देवेश कस्य स्तोत्रं महेश्वर ॥

* * * *

ध्यानम्—

कृष्णेन्दीवरकान्तिमिन्दुवदनं बर्हावतंसप्रियं
श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् ।
गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं
गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे ॥

ओं श्रीगोपालो महीपालो वेदवेदाङ्गपारगः ।
कृष्णः कमलपत्राक्षः पुण्डरीकस्सनातनः ॥

End :

भक्ताभीष्टप्रदस्सर्वभक्ताघौघनिकृन्तकः ।
अपारकरुणासिन्धुर्भगवान् भक्तवत्सलः ॥

श्रीगोपालो मही(हा)देवि वसेत्तस्य गृहे तदा ।
यद्गृहे (तु) सहस्रञ्च नाम्नां तिष्ठति पूजितम् ॥

Colophon :

इति श्रीसम्मोहनतन्त्रे हरगौरीसंवादे श्रीगोपालसहस्रनामस्तोत्रं सम्पूर्णम् ॥

No. **8924.** गोपालाष्टोत्तरशतनामस्तोत्रम्.

GOPĀLĀṢṬOTTARAŚATANĀMASTOTRAM.

Pages, 6. Lines, 4 on a page.

Begins on fol. 152*a* of the MS. described under No. 29.

Complete.

Similar to the one described under No. 8889.

Beginning :

गोपालबालतनयो गोपगोकुलनायकः ।
गोपालो गोकुलानन्दो गोपसंरक्षणोत्सुकः ॥

End :

गोपेशो गोकुलाराध्यो गोगोपीजनवल्लभः ।
इत्येवं गोपिकानाथनाम्नामष्टोत्तरं शतम् ॥
साज्यं सुवर्तिसंयुक्तं वह्निना योजितं प्रियम् ।
गृहाण मङ्गलं दीपं त्रैलोक्यतिमिरापह(म्) ॥
भक्त्या दीपं प्रयच्छामि देवाय परमात्मने ।
त्राहि मां नरकाद्घोर(रात्) दिव्यज्योतिर्नमोऽस्तु ते ॥ दीपम् ॥

No. **8925.** गोपालाष्टोत्तरशतनामावलिः.

GOPALĀṢṬOTTARAŚATANĀMĀVALIḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 149*a* of the MS. described under No. 29.

Complete.

Similar to the above. These names are intended to be recited at the time of worship.

Beginning:

गोपालबालतनयाय नमः । गोपगोकुलनायकाय नमः । गोपालाय नमः ।गोकुलानन्दाय नमः । गोपसंरक्षणोत्सुकाय नमः ।

End:

गोपीशाय नमः । गोकुलाराध्याय नमः । गोपीजनवल्लभाय नमः ॥

Colophon:

इति गोपालाष्टोत्तरशतनामावलिः समाप्ता ॥

No. 8926. दत्तात्रेयद्वादशनामस्तोत्रम्.

DATTĀTRĒYADVĀDAŚANĀMASTOTRAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 78*b* of the MS. described under No. 21.

Complete.

Gives twelve names in praise of Dattātrēya, the son of Atri and Anasūya. He is considered to be an incarnation of Viṣṇu. This Stōtra is also known as Mantrarāja, and a repetition of these names is considered to remove one's sins.

Beginning:

अस्य श्रीदत्तात्रेयद्वादशनामस्तोत्रमहामन्त्रस्य परमहंस ऋषिः, श्रीदत्तात्रेयपरमात्मा देवता, श्रीदत्तात्रेयप्रसाद . . विनियोगः ।

प्रथमस्तु महायोगी द्वितीयः प्रभुरीश्वरः ।
तृतियश्च त्रयीमूर्तिः चतुर्थो ज्ञानसागरः ॥

End:

एतानि द्वादशनामानि आत्रेयस्य महात्मनः ।
मन्त्रराजमिति ख्यातं सर्वपापहरं परम् ॥

* * * *

जयतु जयतु दत्तो अ(ह्य)त्रिनन्दप्रसूतो जयतु जयतु दत्तोऽ(ऽथा)नसूया-
तनूजः ।
जयतु जयतु दत्तस्सर्वयोगीन्द्रवन्द्यः जयतु जयतु दत्तो भोगमोक्षप्रदाता ॥

No. 8927. दत्तात्रेयपञ्चाशन्नामस्तोत्रम्.

DATTĀTRĒYAPAÑCĀŚANNĀMASTŌTRAM.

Pages, 3. Lines, 9 on a page.

Begins on fol. 10*a* of the MS. described under No. 5868.

Complete.

Gives the fifty eulogistic names of Dattātrēya. A repetition of these names is considered to make efficacious the Mantra repeated by a person.

Beginning:

अस्य श्रीदत्तात्रेयपञ्चाशन्नामस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, दत्तात्रेयो देवता, श्रीदत्तात्रेयाय जपे विनियोगः ।

अत्रिभूरानसूयेयो हरिर्जैवातृकानुजः ।
दुर्वासस्याग्रजः कृष्णोऽवधूतः कपिलानुजः ॥

End:

मायावान्मायिकं वेत्ति यं विना नास्ति हि द्वयः(म्) ।
अधिष्ठानतया तस्य सोऽहं दत्तो न संशयः ॥

* * * *

सर्वेश्च ध्यानयोगेन ब्राह्मणानाञ्च भोजनम् ॥
सर्वत्र तन्मयं जप्यं तस्य चारित्रकीर्तनात् ।
मन्त्रसिद्धिर्भवेच्छीघ्रं वाञ्छितार्थप्रदायिनी ॥

No. 8928. दत्तात्रेयसहस्रनामस्तोत्रम्.
DATTĀTRĒYASAHASRANAMASTŌTRAM

Pages, 10. Lines, 9 on a page.

Begins on fol. 74*a* of the MS. described under No. 21.

Complete. Bhaviṣyōttarapurāṇa.

Gives one thousand names in praise of Dattātrēya.

Beginning:

प्रणम्य परमानन्दमादिदेवं जगत्पतिम् ।
दत्तात्रेयं महात्मानं सत्यविज्ञानभास्करम् ॥
नमस्ते शिवरूपाय नित्यानन्दाय निर्गुण(ण) ।
ज्ञानगम्याय शुद्धाय गुरवे ब्रह्ममूर्तये ॥

* * * *

अस्य श्रीदत्तात्रेयसहस्रनामस्तोत्रमहामन्त्रस्य परमहंस ऋषिः, अनुष्टुप् छन्दः, दत्तात्रेयपरमात्मा देवता, ओं इति बीजम्, द्रं इति शक्तिः, तं इति कीलकम्, त्यं इति व्यापकम्, मम श्रीदत्तात्रेयकारुण्यप्रसाद . . विनियोगः ।

* * * *

ओं दत्तात्रेयो महायोगी योगीश अमरः प्रभुः ।
मुनिर्दिगम्बरो बालो मायामुक्तो मदापहः ॥
अवधूतो महानादः शङ्करोऽमरवल्लभः ।
महादेवश्चादिदेवः पुराणप्रभुरीश्वरः ॥

End:

नामरूपान्तकश्चैव यद्वाग्ज्ञाननगोचरम् ।
सर्वं दत्तात्मकं विश्वं भावाभावोद्भवादिकम् ॥
इति श्रीपरमं गुह्यं पवित्रं पापनाशनम् ।
दत्तात्रेयसहस्राख्यं नामस्तोत्रं कृतं मया ॥
अतीतानागतश्चैव वर्तमानं तथैव च ।

ते विदुर्ये पठन्त्येतद्गुह्याद्गुह्यतरं तपः ॥

* * * *

देशकालार्थनिर्मुक्तं देशकालगुणाश्रयम् ।
गुणधन्यपवित्रञ्च दत्तात्रेयं गुरुं नुमः ॥

Colophon :

इति श्रीभविष्योत्तरपुराणे सिंहाद्रिखण्डे दत्तात्रेयसहस्रनामस्तोत्रं सम्पूर्णम् ॥

No. **8929.** दत्तात्रेयसहस्रनामस्तोत्रम्.

DATTĀTREYASAHASRANĀMASTOTRAM.

Pages, 18. Lines, 7 on a page.

Begins on fol. 51*a* of the MS. described under No. 5445

Complete.

Similar to the above.

The repetition of these names is here stated to absolve one of the sin of murdering a Brahmin.

This was taught to Purandara by Subrahmaṇya.

Beginning :

पुरन्दर उवाच—

स्कन्ददेव सुरत्रातः शशिशेखरनन्दन ।
बहुश्रुतो बहुज्ञस्त्वं श्रुतं सर्वं महेश्वरात् ॥
ब्रह्महत्यानिवृत्तिर्मे केनोपायेन शाङ्करे ।
ब्रह्महत्यानिवृत्त्यर्थमुपायं वद मे प्रभो ॥
लोकापवाददुरितात्कीर्तिलक्ष्मीविनाशनात् ।
दारिद्र्यशीलदुरितवैदुष्यक्लेशकारणात् ॥
तनुत्यागो वरमिति भाति मे शिवनन्दन ।

स्कन्दः—

पाकशासन मा भैषीः सर्वं भद्रं भविष्यति ॥
सुरवन्दित देवेन्द्र त्वादिष्टञ्च जगद्धितम् ।

* * * *

शृणुष्वाष्टोत्तरशतं सहस्रेणैकगर्भितम् ।
स्तोत्रं वक्ष्ये विधानेन छन्दर्षिन्यासपूर्वकम् ॥

अस्य श्रीदत्तात्रेयाष्टोत्तरशतसहस्रनामस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, गायत्र्यनुष्टुप् छन्दांसि, दत्तात्रेयपरमात्मा देवता, अवधूत इति बीजम्, योगीति शक्तिः, मोक्षदायक इति कीलकम्, दत्तात्रेयसिद्ध्यर्थे जपे विनियोगः । दत्तात्रेयाय ज्ञानात्मने अङ्गुष्ठाभ्यां नमः ।

* * * *

दत्तात्रेयः स्वयंव्यक्तः सर्वज्ञः पुरुषोत्तमः ।
अवधूतो हरिः कृष्णः केशवः क्लेशनाशनः
मुनिर्दिगम्बरो बालो हृषीकेशस्त्रिविक्रमः ।
दत्तश्च मदनश्शार्ङ्गी दान्तस्सर्वजनप्रियः ॥

End :

तत्त्वस्वरूपस्तत्त्वादिश्श्रीजिष्णुर्मोक्षदायकः ।
तृणीकृतजगद्भुक्तनिदानः परमेश्वरः ॥
इत्येतानि मयोक्तानि दत्तात्रेयस्य योगिनः ।
पुरा सहस्रनामानि पठितानि विरिञ्चिना ॥

* * * *

सङ्ग्रामे वाप्यसङ्ग्रामे युद्धे जयति . . ॥

No. 8930. दत्तात्रेयाष्टोत्तरशतनामस्तोत्रम्.

DATTĀTRĒYĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 6387.

Complete.

Gives one hundred and eight names in praise of Dattātrēya.

Beginning :

अस्य श्रीदत्तात्रेयाष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य विश्वामित्र ऋषिः, अनुष्टुप् छन्दः, श्रीदत्तात्रेयपरमात्मा देवता, आं बीजम्, श्रीं शक्तिः, ह्रीं कीलकम्, मम समस्तापन्निवारणार्थे श्रीमहालक्ष्मीसहितदत्तात्रेयपरमगुरुमूर्तिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

देवाय देवदत्ताय दत्तात्रेयाय योगिने ।
योगीश्वराय योगाय योगानन्दप्रदायिने ॥

End :

नमोऽनन्ताय शान्ताय कवये गुरवेऽपि च ।
इति श्रीदत्तात्रेयाष्टोत्तरशतनामस्मरणमात्रेण सर्वसिद्धिमवाप्नुयात् ॥

No. **8931.** दत्तात्रेयाष्टोत्तरशतनामस्तोत्रम्.

DATTĀTRĒYĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 10. Lines, 5 on a page.

Begins on fol. 12*a* of the MS. described under No. 6393.

Complete.

Same as the above.

No. **8932.** दशावतारनामावलिः

DAŚĀVATĀRANĀMĀVALIḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 46*a* of the MS. described under No. 3546, wherein this has been omitted to be given in the list of other works

Complete.

Gives the names of the ten Avataras or incarnations of Viṣṇu.

Beginning :

मत्स्याय नमः । कूर्माय नमः । वराहाय नमः ।

End :

बलरामाय नमः । कृष्णाय नमः । कल्किने नमः ॥

No. **8933.** नाममौक्तिकमाला.

NĀMAMAUKTIKAMĀLĀ.

Pages, 3. Lines, 10 on a page.

Begins on fol. 17*a* of the MS. described under No. 3877, wherein this has been given as Nāmamālā among the other works.

Complete.

A collection of 128 names of Visnu by Yamunacarya.

Beginning:

यत्पादाम्भोरुहध्यानविध्वस्ताशेषकिल्बिषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥
श्रीनाममौक्तिकैर्माला यामुनार्येण निर्मिता ।
ऋषिसु(शु)क्तिसमुद्भूतैर्निर्दोषैः श्रुतिसागरे ॥
श्रीमन्नारायणाद्रीश श्रीमन्नञ्जनशैलप ।
श्रीमद्वृषभशैलेन्द्र श्रीमत्सिंहनगाधिप ॥
श्रीशेषगोत्रभरण श्रीनिवासेति कीर्तये ।
अच्युतानन्त गोविन्द मुकुन्द गरुडध्वज ॥
जगदानन्दजनक जगज्जन्मादिकारण ।
नारायण जगन्नाथ शरणागतवत्सल ॥

End:

करीन्द्रवरदानन्त श्रीधर श्रीनिकेतन ।
निरवद्य परब्रह्मन् सर्वलोकपदाश्रय ॥
नाथसेव्यपदाम्भोज वकुलाभरणाश्रय ।
रामारामाभिरामाङ्ग रामकृष्णेति कीर्तये ॥
श्रीमद्वेङ्कटनाथमादिपुरुषं पूर्णं परं शाश्वतं
श्रीनाथं शरणागतार्तिहरणं नारायणं संश्रये ।
कृष्णं विष्णुमनन्तमच्युतमजं गोविन्दमिन्दीवर-
श्यामं नन्दकशङ्खचक्ररुचिरं ध्यायन् भजे कीर्तये ।
येन तत्पठ्यते नाम्नामष्टाविंशोत्तरं शतम् ।
अनिष्टपक्षक्षपणमिष्टावाप्तिरवाप्यते ॥

No. **8934.** नारायणाष्टोत्तरशतनामस्तोत्रम्.

NĀRĀYANĀṢṬOTTARAŚATANĀMASTŌTRAM.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 3. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 78*a*. The other works herein are Viṣṇusahasranāmabhāṣya 1*a*, Āpastambadharmasūtra 64*a*, Nārāyaṇavarma 79*b*.

Complete. From Brahmāṇḍapurāṇa.

Gives one hundred and eight names in praise of Nārāyaṇa *i.e.*, Viṣṇu. The authorship of this eulogy is attributed to Śēṣa or the serpent-god ; and it is said to have been taught by Varāha to Dharaṇī (the goddess of earth). The repetition of these names is considered to absolve one from sins.

Beginning :

अस्य श्रीनारायणाष्टोत्तरशतदिव्यस्तोत्रमहामन्त्रस्य श्रीशेषभगवान् ऋषिः, श्रीनारायणः परमात्मा देवता, अनुष्टुप् छन्दः, समस्तपापक्षयद्वारा श्रीनारायणप्रीत्यर्थे विनियोगः ।

नारायणो नरश्शौरिश्चक्रपाणिर्जनार्दनः ।
वासुदेवो जगद्योनिर्वामनो ज्ञानपञ्जरः ॥
श्रीवल्लभो जगन्नाथश्चतुर्मूर्तिश्चतुर्भुजः ।
देवदेवो हृषीकेशश्शङ्करो गरुडध्वजः ॥

End :

निष्कलङ्को निराभासो निर्विकल्पो निरामयः ।
भक्तवश्यो महोदारः पुण्यकीर्तिः पुरातनः ॥
इति त्रैलोक्यनाथस्य विष्णुमूर्तेर्वरानने ।
नाम्नामष्टशतं चैवमशेषेण प्रकीर्तितम् ॥
असितजलदवर्णं वर्ण्यमौ(र्णनो)पाधिहीनं
निखिलनिगमवेद्यं गुह्यमेकान्तसूक्ष्मम् ।
अमलममलदृष्ट्या देवि पश्यन्ति ये मां
हृदयकमलमध्ये देवि मुक्ता भवन्ति ॥

Colophon:

इति ब्रह्माण्डपुराणे धरणीवराहसंवादे नारायणाष्टोत्तरशतदिव्य नामस्तोत्रं संपूर्णम् ॥

No. **8935.** नारायणाष्टोत्तरशतनामस्तोत्रम्.

NĀRĀYAṆĀṢṬŌTTARAŚATANĀMASTŌTRAM

Pages, 4. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 6487.

Wants beginning. Complete. From Varāhapurāṇa.

Same as the above except the colophon.

Colophon:

इति श्रीवराहपुराणे धरणीभूवराहसंवादे नारायणाष्टोत्तरशतं संपूर्णम् ॥

No. **8936.** नारायणाष्टोत्तरशतनामस्तोत्रम्.

NĀRĀYAṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 10*a* of the MS. described under No. 896.

Complete. From Brahmāṇḍapurāṇa.

Similar to the above.

This is said to have been taught to Pārvatī by Paramēśvara.

Beginning:

कैलासशिखरे रम्ये देवदेवमुमापतिम् ।
प्रणिपत्य महादेवी सर्वलोकहिताय वै ॥
अष्टोत्तरशतं विष्णोर्धर्मकामार्थमोक्षदम् ।
वर(द) मे परमेशान यद्यस्ति करुणा मयि ॥
इति पप्रच्छ देवेशी लोकानां परमेश्वरी ।

शिव उवाच—

शृणु देवि प्रवक्ष्यामि नाम्नामष्टोत्तरं शतम् ।
नारायणस्य देवस्य विष्णोरमिततेजसः ॥

शिवः—

श्रीमान्नारायणो विष्णुर्भगवान् पुरुषोत्तमः ।
वैकुण्ठो वामनो वीरो विश्वरूपो जनार्दनः ॥
कमलावल्लभः कान्तः करुणामृतवारिधिः ।
प्रद्युम्नजनकोऽनन्तो गोविन्दो गोकुलोद्वहः ॥

End:

हिरण्यगर्भो मार्ताण्डश्शंभुरीशः प्रजापतिः ।
सर्वलोकेश्वरश्शुद्धः सच्चिदानन्दविग्रहः ॥
इत्येतत्कथितं देवि विष्णोर्नारायणस्य ते ।
रहस्यातिरहस्यं च गोपनीयं विशेषतः ॥
सर्वपापप्रशमनमायुर्वर्धनमुत्तमम् ॥
अणिमादिविभूतीनां ब्रह्मरुद्रादिसंपदाम् ॥
मङ्गलानां च जनकं भोगमोक्षप्रदं नृणाम् ।
इदमष्टोत्तरशतं नाम्नां नारायणस्य भोः ॥
तदद्य कथितं विप्रा युष्मभ्यं गुर्वनुग्रहात् ।
भवाद्भिरपि शिष्येभ्यो देयं सद्भ्यो विशेषतः ॥

Colophon:

इति ब्रह्माण्डपुराणे ब्रह्मनारदसंवादे अष्टमोऽध्यायः ।

No. **8937.** नृसिंहद्वादशनामस्तोत्रम्.

NṚSIṀHADVĀDAŚANĀMASTŌTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 21*b* of the MS. described under No. 2886, wherein this has been omitted to be mentioned among the other works.

Complete.

Gives twelve names in praise of Nṛsiṁha

Beginning:

प्रथमस्तु महाज्वालो द्वितीयश्चोग्रकेसरी ।

तृतीयः कृष्णपिङ्गाक्षश्चतुर्थस्तु विदारणः ॥
पञ्चास्यः पञ्चमश्चैव षष्ठः कशिपुमर्दनः ।

End:

एतानि द्वादश नामानि नृसिंहस्य महात्मनः ।
मन्त्रराजमिति प्रोक्तं सर्वपापहरं परम् ॥
माता नृसिंहश्च पिता नृसिंहो भ्राता नृसिंहश्च तथा नृसिंहः ।
विद्या नृसिंहो द्रविणं नृसिंहः स्वामी नृसिंहः सकलं नृसिंहः ॥
यतो नृसिंहः परतो नृसिंहो यतो यतो यामि ततो नृसिंहः ।
नृसिंहदेवाद्य(द्)धिकं न किंचित्ततो नृसिंहं शरणं प्रपद्ये ॥

No. 8938. नृसिंहसहस्रनामस्तोत्रम्.

NṚSIṀHASAHASRANĀMASTŌTRAM.

Pages, 22. Lines, 7 on a page.

Begins on fol. 6a of the MS. described under No. 6514.

Complete. From Nṛsiṁhapurāṇa.

1,008 names in praise of Nṛsiṁha, one of the ten incarnations of Viṣṇu. These names were said to have been first uttered by Brahman to appease Nṛsiṁha immediately after the slaughter of Hiraṇyakaśipu.

Beginning:

एवं युद्धमभूद्धोरं रौद्रं दैत्यबलैस्सह ।
दैत्येन्द्रसाहसं दृष्ट्वा देवाश्चेन्द्रपुरोगमाः ॥
श्रेयः कस्य भवेत्तत्र इति चिन्तापराभवन् ।
तदा क्रुद्धो नृसिंहस्तु दैत्येन्द्रप्रहितान्यपि ॥
विष्णुचक्रं महाचक्रं कालचक्रं तु वैष्णवम् ।
रौद्रं पाशुपतं ब्राह्मं कौबेरं कौलिशासनम् ॥
आग्नेयं (आग्नेयं) वारुणं सौम्यं मोहनं सौरपार्वतम् ।
भार्गवादिबहून्यस्त्राण्यभक्षयत कोपतः ॥
ततः खड्गधरं दैत्यं जग्राह नरकेसरी ।

सन्ध्याकाले सभाद्वारे स्वाङ्के निक्षिप्य भैरवः ॥
हिरण्यकशिपोर्वक्षो विदार्यातीव रोषितः ।

* * * *

अतिरौद्रं महाकायं महादंष्ट्रं महाभुजम् ॥
महाजिह्वं महारूपं दृष्ट्वा संक्षुभितं जगत् ।
सर्वदेवगणैस्सार्धं तत्रागत्य पितामहः ॥
आगन्तुकैर्भूतपूर्वैर्वर्धमानैरनुत्तमैः ।
गुणैर्नामसहस्रेण तुष्टाव श्रुतिसंमितैः ॥

ओं लक्ष्मीनृसिंहाय हृदयज्ञाने मुद्रां निधाय यं रं लं वं इति जपित्वा, अस्य श्रीलक्ष्मीनृसिंहदिव्यसहस्रनामस्तोत्रमहामन्त्रस्य प्रह्लादो भगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीलक्ष्मीनृसिंहः परमात्मा देवता ।

(वासुदेवाय) वन्द्याय वरदाय वरात्मने ।
वरदाभयहस्ताय वराय वररूपिणे ॥
वरेण्याय वरिष्ठाय श्रीवराय नमो नमः ।
प्रह्लादवरदायैव प्रत्यक्षवरदाय च ॥

End:

मार्कण्डेय उवाच—

इत्युक्त्वा देवदेवेशो लक्ष्मीमालिङ्ग्य लीलया ।
प्रह्लादस्याभिषेकं तु ब्रह्मणे चोपदिष्टवान् ॥
ब्रह्मा वै दैत्यराजानं प्रह्लादमभिषिच्य च ।
दैवतैस्सह सङ्गम्य ह्यात्मलोकं ययौ स्वयम् ॥

Colophon:

इति श्रीनृसिंहपुराणे नृसिंहदिव्यसहस्रनामस्तोत्रं संपूर्णम् ॥

506

No. 8939. नृसिंहसहस्रनामस्तोत्रम्.
NṚSIṀHASAHASRANĀMASTŌTRAM.

Pages, 21. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 429.

Complete. From Mārkaṇḍēyapurāṇa.

Same as the above except in the introduction and conclusion.

Beginning :

नृसिंहाय नमः—

भवसञ्चितपापौघं(घ)विघ्नध्वंसविचक्षणम् ।
विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे ॥

मार्कण्डेय उवाच—

एवं युद्धमभूद्धोरं रौद्रं दैत्यबलैस्सह ।
नृसिंहस्याङ्गसंभूतैर्नारसिंहैरनेकशः ॥
दैत्यकोट्यो (हता)स्तत्र केचिद्भीताः पलायिताः ।
तं दृष्ट्वातीव संक्रुद्धो हिरण्यकशिपुं स्वयम् ।
भूतपूर्वैरमृत्युर्मे इति वेदविदो विदुः ॥

* * * *

अस्य श्रीनृसिंहसहस्रनामस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीलक्ष्मीनृसिंहो देवता, क्ष्रां बीजं, श्रीं शक्तिः, नखदंष्ट्रायुधायेति कीलकं, श्रीनृसिंहप्रसादसिद्ध्यर्थे जपे विनियोगः । . . .

ब्रह्मा उवाच—

ओंनमश्श्रीनृसिंहाय वज्रदंष्ट्राय वज्रिणे ।
वज्रदेहाय वज्राय नमो वज्रनमी(खा)य च ॥
वासुदेवाय वन्द्याय वरदाय वरात्मने ।
वरदाभयहस्ताय वराय वररूपिणे ॥
वरेण्याय वरिष्ठाय श्रीवराय नमो नमः ।

End :

नमो नमस्ते जयसिंहरूप नमो नमस्ते वरसिंहरूप ।
नमो नमस्ते रणसिंहरूप नमो नमस्ते नरसिंहरूप ॥
उद्धृत्य गर्जितं दैत्यं निहत्याजौ सुरद्विषम् ।

* * * *

अयमेव परो धर्मः अयमेव परं तपः ।
अयमेव परं नाम अयमेव परं स्तवः ॥
अयमेव सदाचारः अयमेव महर्षिच(र्षयः) ।
अयमेव त्रयो वेदाः स्वशास्त्रगमनानि च ॥

Colophon :

इति मार्कण्डेयपुराणे श्रीलक्ष्मीनृसिंहादिव्यसहस्रनामस्तोत्रं संपूर्णम् ॥

No. 8940. नृसिंहसहस्रनामस्तोत्रम्.
NṚSIṀHASAHASRANĀMASTŌTRAM.

Substance, palm-leaf. Size, 11⅜ × 1⅜ inches. Pages, 45. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 19*a*. The other work herein is Visnusahasranāmastōtra 1*a*.

Same as the above, but the colophon is different.

Colophon :

इति स्तोत्ररत्नाकरे नारसिंहपुराणे सर्वार्थसाधनं नाम ब्रह्मणा कृतं नृसिंहसहस्रनामस्तोत्रं संपूर्णम् ॥

No. 8941. नृसिंहसहस्रनामस्तोत्रम्.
NṚSIṀHASAHASRANĀMASTŌTRAM.

Pages, 27. Lines, 20 on a page.

Begins on fol. 166*a* of the MS. described under No. 2961.

Complete.

Same as the above except colophon.

Colophon :

इति श्रीनारसिंहपुराणे सर्वार्थसाधनं नाम नृसिंहसहस्रनामस्तोत्रं संपूर्णम् ॥

No. **8942.** नृसिंहसहस्रनामस्तोत्रम्.

NṚSIṀHASAHASRANĀMASTŌTRAM.

Pages, 7. Lines, 12 on a page.

Begins on fol. 79*a* of the MS. described under No. 560

Complete. Wants beginning.

Same as the above except colophon.

Colophon :

इति श्रीनृसिंहपुराणे मार्कण्डेयनृसिंहसंवादे ब्रह्मणा कृतं श्रीनृसिंह-सहस्रनामस्तोत्रं संपूर्णम् ॥

No. **8943.** नृसिंहसहस्रनामस्तोत्रम्.

NṚSIṀHASAHASRANĀMASTŌTRAM.

Pages, 33. Lines, 18 on a page.

Begins on fol. 123*a* of the MS. described under No. 5959.

Complete. This forms the 102nd Adhyāya of Nṛsiṁhapurāṇa

Same as the above for the beginning.

End :

ब्रह्मघ्नश्च कृतघ्नश्च भ्रूणहा गुरुतल्पगः ॥
मुच्यते सर्वपापेभ्यः कृतघ्नस्त्रीविघातकः ।
असत्यस्तु सदा यज्ञनिन्दको लोकनिन्दकः ॥
कथितं नारसिंहस्य चरितं पापनाशनम् ।
सर्वार्थसाधनं दिव्यं किं भूयश्श्रोतुमिच्छसि ॥

Colophon :

इति श्रीनृसिंहपुराणस्तोत्ररत्नाकरे श्रीनृसिंहप्रादुर्भावे आपदुद्धारि-घोरवीरलक्ष्मीनृसिंहदिव्यसहस्रनामस्तोत्रमन्त्रराजजपसर्वार्थसाधनं नाम द्विश-ति(त)तमोऽध्यायः ॥

No. 8944. नृसिंहसहस्रनामस्तोत्रम्.

NṚSIṀHASAHASRANĀMASTŌTRAM.

Substance, palm-leaf. Size, 15¼ × 1⅜ inches. Pages, 15. Lines, 6 on a page. Character, Nandinägarī. Condition, injured. Appearance, old.

Begins on fol 9*a*. The other works herein are Viṣṇusahasranāmastōtra 1*a*, Vāsudēvasahasranāmastōtra 17*a*.

Complete. Forms the 21st Adhyāya of Stōtra-Ratnākara.

Similar to the above.

Beginning:

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे नारसिंहमहाबलम् ॥
वागीशाद्यास्सुरगणाः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्यास्स्युस्तं नमामि गजाननम् ॥

End:

कथितं नारसिंहस्य चरितं पापनाशनम् ।
सर्वार्थसाधनं दिव्यं किं भूयः श्रोतुमिच्छसि ॥

Colophon:

इति स्तोत्ररत्नाकरे मन्त्रराजश्रीलक्ष्मीनृसिंहप्रादुर्भावे ब्रह्मणोक्तं श्रीमन्त्रराजश्रीलक्ष्मीनृसिंहदिव्यसहस्रनाममन्त्रजपं सर्वार्थसाधन एकविंशतितमोऽध्यायः समाप्तः ॥

No. 8945. नृसिंहसहस्रनामावलिः.

NṚSIṀHASAHASRANĀMĀVALIḤ.

Pages, 14. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 8795.

Complete.

Similar to the above, but the names here given are intended to be used in connection with flower-offerings.

Beginning :

ओं श्रीनृसिंहाय नमः ।
वज्रदौ(दं)ष्ट्राय नमः ।
वज्रिणे नमः ।
वज्रदेहाय नमः ।
वज्राय नमः ।
वज्रनखाय नमः ।
वसुदेवाय नमः ।
वन्द्याय नमः ।
वरदाय नमः ।
वरात्मने नमः ।
वरदाभयहस्ताय नमः ।
वराय नमः ।
वररूपिणे नमः ।
वरेण्याय नमः ।
वरिष्ठाय नमः ।

End :

सप्ताश्वरथरूपिणे नमः । सप्तवायुस्वरूपाय नमः । सप्तच्छन्दोमयाय नमः । स्वच्छाय नमः । स्वच्छरूपाय नमः ॥

No. **8946.** नृसिंहाष्टोत्तरशतनामस्तोत्रम्.

NṚSIṀHĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 24 on a page.

Begins on fol. 121*b* of the MS. described under No. 5959.

Complete.

Gives 108 names in praise of Nṛsiṁha. The repetition of these names is said to confer learning, intelligence, wealth, happiness, and salvation.

Beginning :

अस्य श्रीनृसिंहाष्टोत्तरशतदिव्यनामामृतस्तोत्रमन्त्रस्य निटिलाक्षो भगवान् ऋषिः, अनुष्टुप् छन्दः, अघोरश्रीनृसिंहो देवता, स्तम्भोद्भव इति बीजम्, प्रह्लादवरद इति शक्तिः, नारासिंह इति कीलकम्, श्वेत-वर्णलक्ष्मीसमेतंश्रीनृसिंहप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

श्रीनृसिंहो महादेवो दिव्यसिंहो महाबलः ।
उग्रसिंहो देवदेव उपेन्द्रश्चोग्रलोचनः ॥
रौद्रः सर्वाद्भुतश्शौरिर्महावीरस्सुविक्रमः ।

End:

अधोक्षजः सुरः सेव्यो वनमाली ह्यकम्पनः ।
गुरुर्लोकगुरुः श्रेष्ठः परं ज्योतिः परायणः ॥
इत्येतन्नारसिंहस्य नाम्नामष्टोत्तरं शतम् ।

* * * *

विद्यां बुद्धिं श्रियं सौख्यं भुक्तिं मुक्तिं च विन्दति ॥

Colophon:

इति श्रीनृसिंहाष्टोत्तरशतदिव्यनामामृतस्तोत्रं संपूर्णम् ॥

No. **8947.** नृसिंहाष्टोत्तरशतनामस्तोत्रम्.

NṚSIṀHĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 16 on a page.

Begins on fol. 179*b* of the MS. described under No. 2961.

Incomplete.

Same as the above. Wants Pūrvapīṭhikā and Phalaśruti.

No. **8948.** नृसिंहाष्टोत्तरशतनामस्तोत्रम्.

NṚSIṀHĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 4 on a page.

Begins on fol. 15*a* of the MS. described under No. 8900.

Complete.

Same as the above without Pūrvapīṭhikā and Phalaśruti. The work is wrongly attributed in the colophon to Vēṅkaṭanātha.

Colophon:

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु नरसिंहाष्टोत्तरशतकं संपूर्णम् ॥

No. 8949. नृसिंहाष्टोत्तरशतनामस्तोत्रम्.

NṚSIṀHĀṢṬŌTTARAŚATANĀMASTŌTRAM

Page, 1. Lines, 19 on a page.

Begins on fol. 21*b* of the MS. described under No. 2886.

Complete.

Same as the above; without colophon.

No. 8950. नृसिंहाष्टोत्तरशतनामस्तोत्रम्.

NṚSIṀHĀṢṬŌTTARAŚATANĀNASTŌTRAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 43*a* of the MS. described under No. 3546.

Complete.

Same as the above.

No. 8951. नृसिंहाष्टोत्तरशतनामस्तोत्रम्.

NṚSIṀHĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under No. 5338, wherein this was omitted to be given in the list of other works.

Complete.

Similar to the above.

Beginning same as in No. 8946.

End:

श्रीमन्नृसिंहविभवे गरुडध्वजाय तापत्रयोपशमनाय भवौषधाय ।
तृष्णादिवृश्चिकजलाग्निभुजङ्गरोगक्लेशव्ययाय हरये गुरवे नमस्ते ॥

No. 8952. नृसिंहाष्टोत्तरशतनामस्तोत्रम्.

NṚSIṀHĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 5. Lines, 8 on a page.

Begins on fol. 25*a* of the MS. described under No. 5789.

Complete.

Similar to the above.

Beginning :

नारसिंहः पुष्कराक्षः करालविकृताननः ।
हिरण्यकशिपोर्वक्षोविदारणनखायुधः ॥
प्रह्लादवरदः श्रीमान् अप्रमेयपराक्रमः ।
अभक्तजनसंहारी भक्तानामभयप्रदः ॥

End :

स कामी पठतो यस्तु(यः पठेन्नित्यं)सततं विजितेन्द्रियः ॥
सर्वपापविनिर्मुक्तः यास्यते (स याति) परमां गतिम् ।
शेषाय स्वप्रदत्तानां नृसिंहाष्टोत्तरं शतम् ॥

No. 8953. नृसिंहाष्टोत्तरशतनामावलिः.

NṚSIṀHĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 11 on a page.

Begins on fol. 29*b* of the MS. described under No. 5789.

Complete.

The names arranged in metrical form in the work described under the last number are here given separately so as to be used in connection with flower-offerings in the worship of Nṛsiṁha.

Beginning :

नारसिंहाय पुष्कराक्षाय करालविकृताननाय हिरण्यकशिपोर्वक्षोविदारणनखायुधाय नमः । प्रह्लादवरदाय श्रीमते नमः । अप्रमेयपराक्रमाय अभक्तजनसंहारिणे भक्तानामभयप्रदाय नमः । ज्वालामुखवत्तीक्ष्णकेशिने तीक्ष्णदंष्ट्राय नमः

End :

स्वभक्तार्पितकारुण्याय नमः । बहुरूपधृते नमः । श्रीनृसिंहाय नमः ॥

No. **8954.** नृसिंहाष्टोत्तरशतनामावलिः.

NṚSIṀHĀṢṬÖTTARAŚATANĀMĀVALIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 65*a* of the MS. described under No. 8806.

Complete.

Same as the above.

No. **8955.** नृसिंहाष्टोत्तरशतनामावलिः.

NṚSIṀHĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 53*a* of the MS. described under No. 3546.

Complete.

Similar to the above. Gives the names contained in the work described under No. 8946.

Beginning :

ओं नारसिंहाय नमः । ओं महासिंहाय नमः । ओं दिव्यसिंहाय नमः । ओं महाबलाय नमः । ओं उग्रसिंहाय नमः । ओं देवदेवाय नमः ।

End :

अकम्पनाय नमः । गुरवे नमः । लोकभ्रु(गुर)वे नमः । स्रष्टवे नमः । परंज्योतिषे नमः । परायणः(णाय नमः) ॥

Colophon :

नरसिंहार्चनं संपूर्णम् ॥

No. **8956.** नृसिंहाष्टोत्तरशतनामावलिः.

NṚSIṀHĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 24*a* of the MS. described under No. 8900

Incomplete.

Same as the above.

No. 8957. नृसिंहाष्टोत्तरशतनामावलिः.

NṚSIMHĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 9. Lines, 4 on a page.

Begins on fol. 15*a* of the MS. described under No. 8880.

Complete.

Same as the above.

Colophon :

श्रीनृसिंहाष्टोत्तरशतं संपूर्णम् ॥

No. 8958. नृसिंहाष्टोत्तरशतनामावलिः.

NṚSIMHĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 27*b* of the MS. described under No. 8632.

Complete

Same as the above.

Colophon :

श्रीलक्ष्मीनृसिंहाष्टोत्तरशतं सम्पूर्णम् ॥

No. 8959. भगवन्नामावलिः.

BHAGAVANNĀMĀVALIḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 103*a* of the MS. described under No. 5922.

Complete.

Gives a number of names of Viṣṇu probably as worshipped at Śrīraṅgam.

Beginning :

श्रीरङ्गसै(शायिने) नमः । क्षीराब्धिसैनयं(शायिने) नमः । वट-पत्रसैनयं(शायिने) नमः । अनन्तसैनयं(शायिने) नमः । कृष्णाय नमः ।

End :

मधुरिपुवासुदेवाय नमः । देवकीनन्दनाय नमः । श्रीमद्भट्टाक्य-(ख्या)कलङ्कमहामुनीन्द्राय नमः । श्रीमद्भट्टारकार्याय नमः ॥

No. 8960. यदुगिरिनारायणाष्टोत्तरशतनामावलिः.

YADUGIRINĀRĀYAṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 9. Lines, 4 on a page.

Begins on fol. 27*a* of the MS. described under No. 8880.

Complete.

Contains 108 names in praise of Yadugirināyaka which is the name of Viṣṇu worshipped at Mēlkōṭa, Mysore. This work is said to form the 84th Adhyāya of Brahmāṇḍapurāṇa and to have been taught by Nārada to Prahlāda.

Beginning:

श्रीमद्यादवशैलशेखरममुं नीलारमाभूपतिं
लोकेशं शरणागतार्तिहरणं पीताम्बरं चक्रिणम् ।
राजत्कौस्तुभहेमसूत्रतुलसीदामश्रिया ऽलंकृतं
वन्दे ऽहं वरपुण्डरीकनयनं ध्येयं सदा योगिभिः ॥

श्रीमते नमः ।
यदुगिरीशाय नमः ।
यादवान्वयनायकाय नमः ।
यज्ञकर्त्रे नमः ।
यज्ञभोक्त्रे नमः ।
यज्ञरूपाय नमः ।
यदूद्वहाय नमः ।
केशवाय नमः ।
कञ्जजाराध्याय नमः ।

End:

श्रीकल्याणसरस्तीरवासिने नमः ।
स्पष्टखिलाधिपाय नमः ।
शङ्खचक्रगदापाणये नमः ।
दिव्यभूषणभूषिताय नमः ।
एवं यदुगिरीशस्य . . . . . मनोरमा ।
मुमुक्षुभिस्सदा धार्या पञ्चकालपरायणैः ॥

* * * *

यः पठेन्नारदेनोक्तं प्रह्लादाय महात्मने ।
मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे क्षेत्रकाण्डे प्रह्लादनारदसंवादे श्रीयदुगिरि-नारायणाष्टोत्तरशतस्तोत्रं नाम चतुरशीतितमोऽध्यायः ॥

No. **8961.** **रङ्गनाथाष्टोत्तरशतनामस्तोत्रम्.**

RAṄGANĀTHĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 6151.

Complete. From Pādmapurāṇa .

Gives 108 names in praise of Raṅganātha in which name Viṣṇu is worshipped at Śrīraṅgam. The names are said to have been taught by Nārada to Prahlāda.

Beginning :

(दिव्यं) श्रीरङ्गनाथाष्टोत्तरशतं(थस्य) नाम्नामष्टोत्तरं शतम् ।
रहस्यमपि तत्सर्वं पप्रच्छ विनयान्वितः ।
सर्वमन्त्ररहस्यं च त्र(त्व)योक्तं संश्रुतं मया ।
पुनरेवाहमिच्छामि श्रोतुं श्रीरङ्गवैभवम् ॥
एवं संपृष्टसंप्रश्नो नारदः प्रहसन्निव ।
उवाच मधुरं वाक्यं स्मरन् श्रीरङ्गनायकम् ॥

श्रीनारदः—

शृणु प्रह्लाद वक्ष्यामि गुह्यात् गुह्यतरं परम् ।
ब्रह्मणश्श्रीधरेणोक्तं तच्छ्रुत्वा कमलासनः ॥
ज्येष्ठपुत्रं समाहूय विरूपाक्षं महामतिम् ।
एतत्सर्वं रहस्यञ्च तस्मै प्रोवाच स प्रभुः ॥
तच्छ्रुत्वा शङ्करस्सर्वं मह्यमाह दयानिधे ।
भगवद्भक्तिनिष्ठस्य तादिदन्तु तवोचितम् ॥
संप्रदायागतश्चैतत् समाहितमनाश्शृणु ।

अस्य श्रीरङ्गनाथाष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीरङ्गनायको देवता, श्रीरङ्गनाथप्रीत्यर्थे जपे विनियोगः । ध्यानश्लोकः—

श्रीरङ्गभोगिशयनोपरि जातनिद्र-
लीलाकृतिं निखिलपालनजागरूकम् ।
श्रीरामचन्द्रकुलदैवतमब्जनाभं
श्रीरङ्गनायकमहं प्रणमामि नित्यम् ॥
श्रीरङ्गेशो रङ्गवासी रङ्गधामा तथा पुनः ।
रङ्गभूमा रङ्गराजो रङ्गनाथो . . सदा ॥

End:

रङ्गदेवोत्तमश्चायं रङ्गसर्वस्सवयव(र्वान्वयस्स) च ।
रङ्गसर्वेश्वरो रङ्गनित्यमङ्गलमेव च ॥

* * * *

अष्टोत्तरशतं दिव्यस्तोत्रं श्रीरङ्गशायिनः ।
पठन् शृण्वन् लिखन् बिभ्रत् रङ्गेशे भक्तिमाप्नुयात् ॥
आयुरारोग्यमैश्वर्यं धनधान्यञ्च विन्दति ।
ज्ञानप्रदं विशेषेण महदैश्वर्यकामिनः ॥

Colophon:

इति श्रीपाद्मपुराणे उत्तरखण्डे महेश्वरनारदसंवादे श्रीरङ्गब्रह्मविद्यायां मन्त्ररहस्ये श्रीरङ्गनाथाष्टोत्तरशतदिव्यनामस्तोत्रं संपूर्णम् ॥

No. 8962. रङ्गनाथाष्टोत्तरशतनामावलिः.

RAṄGANĀTHĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 23*a* of the MS. described under No. 8880.

Complete.

The same names as are mentioned in the work described under the last number are given here so as to be used for purposes of worship.

Beginning :

प्रह्लादो नारदं दृष्ट्वा प्रणिपत्य यथाक्रमम् ।
यदृच्छयागतं प्राह देवर्षिममितं प्रभुम् ॥

श्रीरङ्गेशाय नमः । रङ्गधाम्ने नमः । रङ्गवासिने नमः । रङ्गभूम्ने नमः । रङ्गराजाय नमः । रङ्गनाथाय नमः । रङ्गदेवाय नमः ।

End :

श्रीरङ्गपुराणपुरुषाय नमः । श्रीरङ्गपुरुषोत्तमाय नमः । श्रीरङ्गवत्सरा-(ला)य नमः। श्रीरङ्गलीलाकराय नमः । श्रीरङ्गदेवोत्तमाय नमः। श्री-रङ्गसर्वान्वयाय नमः । श्रीरङ्गनारायणाय नमः । श्रीरङ्गब्रह्मणे नमः ।

Colophon :

श्रीरङ्गाष्टोत्तरं संपूर्णम् ॥

प्रह्लादो नारदं दृष्ट्वा प्रणिपत्य यथाक्रमम् ।
यदृच्छयागतं प्राह देवर्षिममिताप्रियम् ॥

No. 8963. रामद्वादशनामस्तोत्रम्.

RĀMADVĀDAŚANĀMASTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 6*a* of the MS. described under No. 5788.

Complete. From Brahmāṇḍapurāṇa.

Gives 12 names of Viṣṇu, the repetition of which is considered to remove all fears and difficulties.

Beginning :

अस्य श्रीरामद्वादशनामस्तोत्रमन्त्रस्य निटिलाक्षो भगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीरामचन्द्रो देवता, श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः ।

प्रथम श्रीकरं नित्यं द्वितीयं दशरथात्मजम् ।
तृतीयं रामचन्द्रं च चतुर्थं रावणान्तकम् ॥

* * * *

एकादशं च गोविन्दं द्वादशं सेतुबन्धनम् ।
एतानि द्वादश (द्वादशैतानि) नामानि त्रिसन्ध्यां(न्ध्यं)यः पठेन्नरः॥

* * * *

End :

अरण्ये देवसङ्ग्रामे महाभयनिवारणम् ॥
अर्धरात्रं जपेत् स्थित्वा सर्वारिष्टनिवारणम् ।
इह जन्म सुखी भूत्वा तद्विष्णोः परमं पदम् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे श्रीरामद्वादशनामस्तोत्रं संपूर्णम् ॥

No. 8964. रामसहस्रनामस्तोत्रम्.
RĀMASAHASRANĀMASTŌTRAM.

Pages, 17. Lines, 24 on a page.

Begins on fol. 57*a* of the MS. described under No. 5959.

Complete.

This work gives 1,000 names in praise of Rāma which are said to have been taught by Īśvara to Pārvatī The repetition of these names is considered to absolve one of the sin of killing a twice-born.

Beginning :

उमापुत्रं महात्मानं विघ्नराजं समेत्य सः ।
सनत्कुमारः पप्रच्छ सर्वधर्मजितं गुरुम ॥

सनत्कुमार उवाच—

भगवन् सर्वधर्मज्ञ सर्वतत्त्वविशारद ।
द्विजहत्याहरं धर्मं वक्तुमर्हसि मे प्रभो ॥
भवद्विधानो धर्मस्य नास्ति कश्चिज्जगत्त्रये ।

विनायक उवाच—

साधु पृष्टं त्वया ब्रह्मन् सर्वलोकोपकारकम् ।
मया चैतत् कृतं कर्म स्मारितं भवतानघ ॥

* * * *

पार्वत्युवाच—

श्रोतुमिच्छामि देवेश तदहं सर्वकामदम् ।
नाम्नां सहस्रं रामस्य ब्रूहि यद्यस्ति मे दया ॥

ईश्वर उवाच—

अथ वक्ष्यामि भो देवि रामनामसहस्रकम् ।
शृणुष्वैकमनाः स्तोत्रं गुह्याद्गुह्यतमं महत् ॥
ऋषिर्विनायकश्चास्य गायत्री छन्द एव च ।
परब्रह्मात्मको रामो देवता शुभदर्शनः ॥

* * * *

राजीवलोचनश्श्रीमान् श्रीरामो रघुपुङ्गवः ।
रामभद्रस्सदाचारो राजेन्द्रो जानकीपतिः ॥
अग्रगण्यो वरेण्यश्च वरदः परमेश्वरः ।
जनार्दनो जितामित्रः परार्थैकप्रयोजनः ॥
विश्वामित्रप्रियो दान्तश्शत्रुजिच्छत्रुतापनः ।

* * * *

कृपापीयूषजलधिश्शरण्यस्सर्वदेहिनाम् ।
श्रीमान् नारायणश्शार्ङ्गी जगतां पतिरीश्वरः ॥

End :

अनन्तश्श्रीपती रामो गुणभृन्निर्गुणो महान् ।
एवमादीनि नामानि ह्यसंख्यान्यपराणि च ।
उक्तानि तव पुत्रेण विमलानि च धीमता ।

* * * *

ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥
श(रणाग)तघाती च मित्रविस्रम्भघातकः ।
मातृहा पितृहा चैव भ्रूणहा वीरमर्दनः ॥

Colophon :

इति रामनामस्तोत्रं सहस्रनाम संपूर्णम् ॥

507

No. 8965. रामसहस्रनामस्तोत्रम्.
RĀMASAHASRANĀMASTŌTRAM.

Substance, paper. Size, $6\frac{1}{2} \times 5\frac{3}{4}$ inches. Pages, 24. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

This forms the 38th Adhyāya in the Uttarakhaṇḍa of Liṅgapurāṇa.

Same as the above with slight variation in the preliminary passages.

Beginning :

सूत उवाच—

एकदा सुखमासीनौ पार्वतीपरमेश्वरौ ।
अन्योन्याश्लिष्टहृद्बाहू जगद्धेतू जगद्गुरू ॥
इन्द्रादिलोकपालैश्च सेवितौ च परापरौ ।

श्रीपार्वत्युवाच—

श्रोतुमिच्छामि देवेश तदहं सर्वकामदम् ।
नाम्नां सहस्रं रामस्य ब्रूहि यद्यस्ति मे दया ॥

* * * *

राजीवलोचनश्श्रीमान् श्रीरामो रघुपुङ्गवः ।

End :

मातृहा पितृहा चैव भ्रूणहा वीरहा तथा ॥
संवत्सरं क्रमाज्जप्त्वा प्रत्यहं रामसन्निधौ ।
निष्कल्मषं सुखं भुक्त्वा ततो मोक्षमवाप्नुयात् ॥

Colophon :

इति श्रीलिङ्गपुराणे उत्तरखण्डे उमामहेश्वरसंवादे रामसहस्रनाम अष्टात्रिंशोऽध्यायः ॥

No. 8966. रामसहस्रनामस्तोत्रम्.
RĀMASAHASRANĀMASTŌTRAM.

Pages, 14. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3869.

Complete. Wants beginning.

Same as the above except colophon.

Colophon :

इति लिङ्गपुराणे उमामहेश्वरसंवादे श्रीरामसहस्रनामस्तोत्रं संपूर्णम् ॥

No. 8967. रामसहस्रनामस्तोत्रम्.
RĀMASAHASRANĀMASTŌTRAM.

Pages, 23. Lines, 6 on a page.

Begins on fol. 77*a* of the MS. described under No. 204.

Complete.

Same as the above except colophon.

Colophon :

इति श्रीलिङ्गपुराणे उमामहेश्वरसंवादे रामसहस्रनाम(नाम)सप्तमोऽध्यायः ॥

No. 8968. रामसहस्रनामस्तोत्रम्.
RĀMASAHASRANĀMASTŌTRAM.

Pages, 28. Lines, 6 on a page.

Begins on fol. 2*a* of the MS. described under No. 5524.

Complete.

Same as the above except the introductory passages.

Beginning :

अस्य श्रीरामचन्द्रसहस्रनामदिव्यस्तोत्रमन्त्रस्य श्रीसदाशिव ऋषिः, अनुष्टुप् छन्दः, श्रीरामचन्द्रः परमात्मा देवता, श्रीरामचन्द्रप्रीत्यर्थे विनियोगः ।

जपतस्सर्ववेदांश्च सर्वमन्त्रांश्च पार्वति ।

Colophon :

इति श्रीलिङ्गपुराणे उत्तरखण्डे उमामहेश्वरसंवादे श्रीरामनामसहस्र-स्तोत्रं संपूर्णम् ॥

No. 8969. रामसहस्रनामावलिः.

RĀMASAHASRANĀMĀVALIḤ.

Pages, 46. Lines, 8 on a page.

Begins on fol. 18a of the MS. described under No. 898, and not on 17a as shown therein.

Complete.

The same names as are mentioned in the work described under No. 8964 are here given separately so as to be used in the flower-offerings when worshipping Viṣṇu.

Beginning:

ओं श्रीरामचन्द्राय नमः, ओं राजीवलोचनाय नमः, ओं श्रीमते नमः, ओं श्रीरामाय नमः, ओं रघुपुङ्गवाय नमः, ओं रामचन्द्राय नमः, ओं सदाचाराय नमः, ओं राजेन्द्राय नमः, ओं जानकीपतये नमः, ओं अग्रगण्याय नमः, ओं वरेण्याय नमः, ओं वरदाय नमः, ओं परमेश्वराय नमः, ओं सर्वज्ञानाय नमः, ओं जनार्दनाय नमः, ओं जितामित्राय नमः ।

End:

ओं अनन्ताय नमः, ओं श्रीपतये नमः, ओं श्रीरामाय नमः, ओं गुणभृते नमः, ओं निर्गुणाय नमः, ओं महते नमः, ओं श्रीदाय नमः, ओं भूतानां शरण्याय नमः, ओं संस्तुताभीष्टदायकाय नमः, ओं रघुनाथाय नमः, ओं रामचन्द्राय नमः, ओं सर्वेश्वराय नमः ॥

No. 8970. रामसहस्रनामावलिः.

RĀMASAHASRANĀMĀVALIḤ.

Pages, 25. Lines, 6 on a page.

Begins on fol. 1a of the MS. described under No. 8859.

Complete.

Same as the above.

No. 8971. रामसहस्रनामावलिः.
RĀMASAHASRANĀMĀVALIḤ.

Pages, 22. Lines, 7 on a page.

Begins on fol. 73*a* of the MS. described under No. 8632.

Complete.

Similar to the above.

Same as the above for the beginning.

End :

लङ्कानाथसमस्तमस्तकवनभेदनाय नमः, सूर्यान्वयजाताय नमः, पवित्रयशसे नमः, सकलदुरितहारिणे नमः, भूमिभारापहारिणे नमः, दशमुखकुलहारिणे नमः, दैत्यदर्पापहारिणे नमः, सुराकुलभयहारिणे नमः, भूमिजातापहारिणे नमः, त्रिभुवनभयहारिणे नमः, चापधारिणे नमः, श्रीरामचन्द्रपरब्रह्मणे नमः ॥

श्रीरामनामस(I)हस्रपठना[च्छृणुया](च्छ्रवणा)दपि ।
सर्वान् कामानवाप्नोति ततो याति परां गतिम् ॥
पूजाकाले च यो नित्यं रामस(I)हस्रनामभिः ।
पूजां करोति रामस्य स याति परमां गतिम् ॥

No. 8972. रामाष्टाविंशतिदिव्यनामस्तोत्रम्.
RĀMĀṢṬĀVIṂŚATIDIVYANĀMASTÕTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 189*a* of the MS. described under No. 5661, wherein it has been shown as Rāmastōtra.

Complete.

Gives 28 names in praise of Rāma. A repetition of these names three times a day is considered to bestow wealth, learning and freedom from fear and liberation from sins.

Beginning :

अस्य श्रीरामाष्टाविंशतिदिव्यनामस्तोत्रमहामन्त्रस्य श्रीलक्ष्मणो भगवान् ऋषिः, श्रीरामचन्द्रो देवता, ममाभीष्टकाम्यार्थफलसिद्ध्यर्थे श्रीसीतारामचन्द्रप्रीत्यर्थे विनियोगः ।

रघुनाथो रघुश्रेष्ठो राघवो रघुनन्दनः ।
रघूद्वहो हरिर्विष्णुः रामचन्द्रो रघुप्रियः ॥

End :

विश्वामित्रप्रियः शूरः शान्तोदारगुणप्रदः ॥
अष्टाविंशतिनामानि त्रिसंध्यं यः पठेन्नरः ।
स्मरणाद्रामनाम्नां च अचलां(ल)श्रीयुतं भवेत् ॥
विद्यां कन्यां लभेत्प्रायो भूतचोरभयं न तु ।
कोटिजन्मार्जितं पापं क्षणमात्रेण नश्यति ॥

No. 8973. रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 757.

Complete.

This is taken from Hiraṇyagarbhasaṁhitā of Brahmāṇḍa-purāṇa.

A metrical composition giving 108 names in praise of Rāma. A repetition of these names is considered to lead one to salvation.

Beginning :

पार्वत्युवाच—

नमस्तेऽस्तु महादेव कैलासगिरिवासिने ।
सर्वेषामुपकारार्थं मोक्षमार्गं प्रदर्शय ॥

श्रीमहादेव उवाच—

रामचन्द्रस्य माहात्म्यं यदुक्तं ब्रह्मणा पुरा ।
तत्सर्वं कथयिष्यामि शृणु कल्याणदायिनि ॥

* * * *

त्रेतायुगे दाशरथिर्भूत्वा नारायणो बभौ ।

शेषोऽभूल्लक्ष्मणो लक्ष्मीः जानकी शङ्खचक्रके ।
जाते भरतशत्रुघ्नौ देवास्सर्वेऽपि वानराः ॥

* * * *

अस्य श्रीरामाष्टोत्तरशतदिव्यनामामृतस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीं बीजं, जानकी शक्तिः, श्रीरामचन्द्रो देवता, श्रीहनुमत्सीतालक्ष्मणसहितश्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः ।

ध्यानम्—

भवभयहरमेकं भानुकोटिप्रकाशं
करधृतशरचापं कालमेघावभासम् ।
कनकरुचिरवस्त्रं कर्णव(स)त्कुण्डलाढ्यं
कमलविशदनेत्रं सानुजं राममीडे ॥

नमो भगवते श्रीरामाय परमात्मने नमो राजाधिराजाय ज्योतिषां पतये नमः ।

End:

नमो योगरहस्याय सुवर्णज्योतिषे नमः ॥
अष्टोत्तरशतं नाम्नां रामचन्द्रस्य पार्वति ।
इति गुह्यतमं हृद्यं रहस्यमतिदुर्लभम् ॥

* * * *

नाम्नामष्टशतं पठन्ति सततं श्रीरामचन्द्रस्य ते
भोगान् सर्वजनप्रियाभिलषितान् भुक्त्वा मलासंहितान् ।
हित्वा संसृतिबन्धनानि कुशलं स्मृत्वा परं तारकं
ब्रह्म ब्रह्मविदः प्रयान्ति विपुलामन्ते गतिं शाश्वतम् ॥

Colophon:

ओन्तत्सदिति.

श्रीब्रह्माण्डपुराणे हिरण्यगर्भसंहितायां परमरहस्ये उमामहेश्वरसंवादे श्रीरामाष्टोत्तरशतदिव्यनामामृतस्तोत्रं संपूर्णम् ॥

No. 8974. रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 20 on a page.

Begins on fol. 48*a* of the MS. described under No. 5959.

Complete.

Similar to the above, but the names here given are in the nominative case unlike the last, wherein similar names are given in the dative case.

Beginning:

श्रीरामो रामभद्रश्च रामचन्द्रश्च शाश्वतः ।
राजीवलोचनश्श्रीमान् राजेन्द्रो रघुपुङ्गवः ॥
जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः ।
विश्वामित्रप्रियो दान्तश्शरणत्राणतत्परः ॥
वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः ।

End:

परंज्योतिः परंधाम पराशर(काश): परात्परः ।
परेशः पारगः पारः सर्वतीर्थात्मको हरिः ॥
एवं श्रीरामचन्द्रस्य नाम्नामष्टोत्तरं शतम् ।
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्राय नमः ॥

No. 8975. रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 48*a* of the MS. described under No. 5786.

Complete.

Same as the above except the preliminary portion which is extracted below.

Beginning:

अस्य श्रीरामाष्टोत्तरशतदिव्यनामामृतस्तोत्रमहामन्त्रस्य वेदव्यासो भगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीरामचन्द्रो देवता, मम श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः । ध्यानम्—

वामे भूमिसुता पुरस्तु हनुमान् पश्चात् सुमित्रासुत
शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादिकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्
मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ॥

No. 9976. रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM

Pages, 2. Lines, 8 on a page.

Begins on fol. 23*a* of the MS. described under No. 5938.

Complete.

Same as the above except the following portion :—

Beginning :

अस्य श्रीरामाष्टोत्तर(शत)दिव्यनामस्तोत्रमन्त्रस्य वृद्धकौशिक-विश्वामित्रभगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीरामचन्द्रो देवता, लक्ष्मीः शक्तिः, श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

No. 8977. रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 10 on a page.

Begins on fol. 10*a* of the MS. described under No. 6090.

Complete.

Same as the above.

No. 8978. रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Page, 1. Lines, 9 on a page.

Begins on fol. 3*a* of the MS. described under No. 8788.

Complete.

Same as the above.

Colophon:

इति श्रीरामाष्टोत्तरशतं संपूर्णम् ॥

No. **8979.** रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 11*a* of the MS. described under No. 8932.

Complete.

Same as the above.

No. **8980.** रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬOTTARAŚATANĀMASTŌTRAM.

Pages, 8. Lines, 5 on a page.

Begins on fol 25*a* of the MS. described under No. 8900.

Complete.

Same as the above for the beginning.

End:

रघुवंशप्रतिष्ठाता सर्वाव(प)गुणवर्जितः ॥
परमात्मा पराकाशः परेशः पारगः परः ।
परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः ॥
परंज्योतिः परंधाम परेशः परगः परः ।
परमात्मा पराकाशः सर्वदेवात्मकश्शिवः ॥

Colophon:

इति व्यासप्रोक्तरामाष्टोत्तरशतं संपूर्णम् ॥

No. **8981.** रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 3 on a page.

Begins on fol. 187*a* of the MS. described under No. 5661

Complete.

Same as the above.

No. **8982.** रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Page, 1. Lines, 3 on a page.

Begins on fol. 36*a* of the MS. described under No. 239.

Complete.

Same as the above ; without colophon.

No. **8983.** रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 61*a* of the MS. described under No. 4115.

Complete.

Same as the above for the beginning.

End :

जानकीहृदयानन्दचन्दनं रघुनन्दनम् ॥
इत्येवं रामचन्द्रस्य माहात्म्यं वेदसंमितम् ।
कथितं तव गाङ्गेय तस्मात्त्वं वैष्णवोत्तमः ॥

Colophon :

इति श्रीपद्मपुराणे उत्तरखण्डे उमामहेश्वरसंवादे श्रीरामाष्टोत्तरशत-
दिव्यनामस्तोत्रं संपूर्णम् ॥

No. **8984.** रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 10*a* of the MS. described under No. 2886.

Complete.

Same as the above except the following portion :—

Beginning :

श्रीवेदव्यास उवाच—
शृणु गाङ्गेय वक्ष्यामि मितस्याद्भुतकर्मणः ।

नाम्नामष्टोत्तरशतं महापातकनाशनम् ।
नातः परतरं पुण्यं त्रिषु लोकेषु विद्यते ।
* * * *
नामानि रामभद्रस्य सहस्रं तेषु चाधिकम् ।
तेषु चात्यन्तमुख्यानि नामान्यष्टोत्तरं शतम् ॥
विष्णोरेकैकनामानि नाम्नामष्टोत्तरं शतम् ।
तादृङ्नामसहस्रेण रामनाम समं मतम् ॥
* * * *
रामनामाभिधेयानामनुष्टुप् छन्द उच्यते ।
ऋषिस्तु भगवान् व्यासः श्रीरामो देवता मम ॥
प्रीत्यर्थं जानकीभद्रो(द्रुः)एतदद्भुतकर्मणः ।
जपेदष्टाधिकं नाम शतं दशमुखाद्विषः ॥

Colophon :

रामनामाष्टोत्तरशतं संपूर्णम् ॥

No. **8985.** रामाष्टोत्तरशतनामस्तोत्रम्.

RĀMĀṢṬÔTTARAŚATANĀMASTÔTRAM.

Pages, 7. Lines, 5 on a page.

Begins on fol 10*a* of the MS. described under No. 5338 and not on fol. 14*a* as shown therein.

Complete.

Same as the above. The colophon is different.

Colophon :

इति पार्वतीपरमेश्वरसंवादे रामाष्टोत्तरशतदिव्यनामस्तोत्रं संपूर्णम् ॥

No. **8986.** रामाष्टोत्तरशतनामावलिः.

RĀMĀṢṬÔTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 45*a* of the MS. described under No. 3546.

Complete.

The same names as are found in metrical composition in the work described under No. 8974 are here given separately in the dative case with the word नमः added to each so as to be used in connection with flower-offerings.

Beginning:

श्रीरामाय नमः । रामभद्राय नमः । रामचन्द्राय नमः । शाश्वताय नमः । राजीवलोचनाय नमः । श्रीमते नमः । राजेन्द्राय नमः । रघुपुङ्गवाय नमः । जानकीवल्लभाय नमः । जैत्राय नमः । जितामित्राय नमः । जनार्दनाय नमः । विश्वामित्रप्रियाय नमः । दान्ताय नमः । शरणत्राणतत्पराय नमः । वालिप्रमथनाय नमः ।

End:

कल्याणगुणसंपन्नाय, सर्वाभरणभूषिताय, परमात्मने नमः । परब्रह्मणे, सच्युता(च्चिदा)नन्दविग्रहाय, परंज्योतिषे, परंधाम्ने नमः । पराकाशाय, परात्पराय, परेशाय, पारगाय, पाराय, सर्वतीर्थात्मकाय, हरये नमः । श्रीरामाय नमः ॥

Colophon:

रामार्चना संपूर्णा ॥

No. **8987.** रामाष्टोत्तरशतनामावलिः.

RĀMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

